दिनाङ्क :- 26.05.2026

प्रात: - 06:55

## पद्म पुरस्कार

राष्ट्रपतिपदासीना द्रौपदी मुर्मू महोदया ह्यः राष्ट्रपति-भवने आयोजिते नागरिक-अलङ्करण-समारोहे षट्षष्टिः प्रमुखाग्र्यगण्य-विभूतिभ्यः पद्म-पुरस्कारान् प्रादात्। एतेषु द्वाभ्यां विभूतिभ्यां पद्मविभूषणम्, षड्भ्यः पद्मभूषणम् सहैव अष्टपञ्चाशत् विभूतिभ्यः पद्मश्रीः प्रदत्ता। कला-क्षेत्रे विशिष्ट-योगदानार्थं सुप्रसिद्धः चलच्चित्र-अभिनेता धर्मेंद्र सिंह देओल महोदयः मृत्योपरान्तं 'पद्मविभूषण' सम्मानेन अलङ्कृतः। अभिनेतुः भार्या हेमा मालिनी एतं पुरस्कारं स्वीकृतवती। प्रख्यातः भारतीय-सारंगी-वादकः डॉ. एन. राजम् अपि पद्मविभूषण-सम्मानेन सुपूजितः। अस्मिन् अलङ्करण-समारोहे उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीयमन्त्रिणः अमित शाहः, गजेन्द्र सिंह शेखावतः, एच्. डी. कुमारस्वामी च उपस्थिताः आसन्।

## राष्ट्रपति- सिक्किम

राष्ट्रपतिपदासीना द्रौपदी मुर्मू अद्य आरभ्य सिक्किम-राज्यस्य त्रिदिवसात्मिकां यात्रां विधास्यति। सिक्किम-प्रवासकाले सा विविधेषु कार्यक्रमेषु भागं ग्रहीष्यति, अनेकानि स्थानानि च द्रक्ष्यति। राष्ट्रपति-महोदया सायङ्काले गान्तोक नगरे स्थिते 'नाम्ग्याल-इन्स्टीट्यूट-ऑफ-तिब्बतोलॉजी' (Namgyal Institute of Tibetology) इति संस्थां गमिष्यति। सिक्किम-सर्वकारेण तस्याः स्वागताय विपुलाः प्रबन्धाः विहिताः।

## इबोला-संक्रमणम्

विश्व-स्वास्थ्य-सङ्गठनेन 'डेमोक्रेटिक रिपब्लिक ऑफ काङ्गो' अथ युगान्डा-देशेषु इबोला-संक्रमणम् 'अन्ताराष्ट्रिय-चिन्तायाः सार्वजनिक-स्वास्थ्य-आपातकालत्वेन घोषितम्। एतदन्तरं नागर-विमानन-महानिदेशालयेन विमान-विपणीनां कृते एका 'मानक-सञ्चालन-प्रक्रिया' प्रसारिता। अत्रावधेयास्पदं वर्तते यत् विमानेषु अनिवार्यरूपेण पदक्षेपाः विहितव्याः यथा इबोला-सङ्कटं दृष्ट्वा यदि कस्यापि यात्रिणः ज्वरः, दौर्बल्यम्, पीड़ा, शिरोवेदना, कण्ठ-दाहः, वमनित्यादीनि लक्षणानि दृश्यन्ते, तर्हि सः सद्यः एव विमान-कर्मचारिभ्यः आगमनानन्तरं चिकित्सा-विभागेभ्यः सूचयेत्।

महानिदेशालयेन स्पष्टीकृतं यत् भारते आगमनात् एकविंशति दिनानां मध्ये यदि एतादृशानि लक्षणानि उत्पद्यन्ते, तर्हि यात्रिणः निर्दिष्ट-चिकित्सालयेभ्यः चिकित्सा-साहाय्यं प्राप्नुयुः तथा विमानपत्तनात् स्वास्थ्य-कार्यालयं प्रति सूचयेयुः।

## ऋतु

भारतीय-ऋतु-विज्ञान-विभागेन अद्य यावत् मध्य-प्रदेश, ओडिशा, तेलङ्गाना, उत्तर-प्रदेश विदर्भ-क्षेत्रेषु 'उष्ण-स्थितिमुद्दिश्य 'रैड-अलर्ट्' इति रक्तवर्णीया संचेतना प्रसारिता।

विभागेन आगामि-द्वि-त्रि-दिनेषु हरियाणा, चण्डीगढ़, दिल्ली, पञ्जाब, उत्तर-प्रदेश राजस्थान-राज्येषु तीव्र-उष्णतरंगस्य पूर्वसूचना दत्ता। एतादृशी एव स्थितिः अद्य यावत् छत्तीसगढ़, तटीय-आन्ध्र-प्रदेश, हिमाचल-प्रदेश, जम्मू-काश्मीर, लद्दाख, झारखण्ड उत्तराखण्ड-राज्येषु अपि भवितुं सम्भाव्यते।

## आयुष

आयुष-मन्त्री प्रतापराव जाधवः अवदत् यत् सर्वकारः योग-प्राकृतिक-चिकित्सा-माध्यमेन कृत्स्ने हि देशे 'निवारक-स्वास्थ्य-सेवाः' सुदृढीकरोति। नवदेहल्यां आयुष-मन्त्रालयस्य 'संसदीय-परामर्शदात्री-समित्याः' चतुर्थ-उपवेशनस्य अध्यक्षतां कुर्वन् श्री जाधवः अवदत् यत् योगः प्राकृतिक-चिकित्सा च समग्र-निवारक-स्वास्थ्य-सेवायै भारतस्य शाश्वतं योगदानं वर्तते।

अस्मिन् उपवेशने भारते योग-प्राकृतिक-चिकित्सा-क्षेत्रस्य विस्तारे, स्वास्थ्य-संवर्धन-सम्बद्धेषु प्रयासेषु तथा पारम्परिक-चिकित्सा-पद्धतीनां वैश्विक-प्रसारे च विस्तरेण चर्चा अभवत्। सः अग्रे सूचितवान् यत् सम्प्रति विश्वस्य नवत्युत्तरैकशताधिक देशेषु अन्ताराष्ट्रिय-योग-दिवसः सोत्साहं आचर्यते।

।। इति वार्ताः ।।